# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -एप्रिल, २०१९

| | | |
|---|---|---|
| कक्षा -आचार्यप्रथमवर्षम् (SEM-2) | **प्रश्नपत्रम् – २**<br>(C. C.- 4.2.4. New )<br>**योगसूत्रम् ( व्यासभाष्यसहितम् )**<br>**तृतीयचतुर्थपादौ** | **गुणाः - ७०** |
| विषयः - सर्वदर्शनम् | | |
| दिनाङ्कः - ११/०४/२०१९ | | **समयः -११.०० तः ०२.००** |

**प्रथमान्वितिः**

**प्रश्नः १ कस्यचिदेकस्य सूत्रस्य यथाभाष्यं व्याख्या विधेया । ( ०५ )**

(१) तस्य भूमिषु विनियोगः ।

(२) संस्कारसाक्षात्करणात्पूर्वज्ञानम् ।

**प्रश्नः २ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत । ( १० )**

(१) योगदर्शनानुसारं समाधिनिरूपणं कुरुत ।

(२) संयमजयात् योगी कां सिद्धिं प्राप्नोति इति यथाग्रन्थम् उपवर्णयत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ कस्यचिदेकस्य सूत्रस्य यथाभाष्यं व्याख्या विधेया । ( ०५ )**

(१) ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते ।

(२) सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यम् ।

**प्रश्नः ४ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत । ( १० )**

(१) हृदयसंयमात् चित्साक्षात्काररूपं फलं निरूपयत ।

(२) अणिमादिसिद्धिं संयमजयात् योगी कथं प्राप्नोति इति यथाभाष्यं वर्णयत ।

**तृतीयान्वितिः**

**प्रश्नः ५ कस्यचिदेकस्य सूत्रस्य यथाभाष्यं व्याख्या विधेया । ( ०५ )**

(१) कर्माशुक्लाकृष्णं योगिनास्त्रिविधमितरेषाम् ।

(२) सदा ज्ञाताश्चित्तवृत्तयः तत्प्रमोः पुरुषस्य अपरिणामित्वात् ।

**प्रश्नः ६ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत । ( १० )**

(१) पञ्चविधां सिद्धिं निरूपयत ।

(२) त्रिविधं कर्म व्याख्यात ।

**चतुर्थान्वितिः**

**प्रश्नः ७ कस्यचिदेकस्य सूत्रस्य यथाभाष्यं व्याख्या विधेया । ( ०५ )**

(१) एकसमये चोभयानवधारणम् ।

(२) तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्रम् ।

**प्रश्नः ८ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

(१) सत्त्वपुरुषयोः विवेकज्ञानस्य फलं वर्णयत ।

(२) योगदर्शनस्य वैशिष्ट्यं प्रतिपादयत ।

**प्रश्नः ९ केषाञ्चन दशप्रश्नानां अतिलघूत्तरं लिखत ।** **( १० )**

(१) का नाम धारणा ?

(२) किं नाम संयमः ?

(३) योगदर्शनकारः कः ?

(४) प्रथमपादस्य नाम किं योगदर्शने ?

(५) योगस्य अङ्गानि कति सन्ति ?

(६) कतिविधाः परिणामाः ?

(७) पुरुषरुचित्तसंयमात् किं प्राप्यते ?

(८) सूर्यसंयमात् कस्य ज्ञानं जायते ?

(९) क्षुत्पिपासानिवृत्तिः कुत्र संयमात् जायते ?

(१०) दिव्यं श्रोत्रं कदा प्राप्यते ?

(११) योगदर्शने तृतीयपादस्य नाम किम् ?

(१२) योगदर्शने चतुर्थपादस्य नाम किम् ?

(१३) अविद्यादिक्लेशनिवृत्तिः केन भवति ?

(१४) वाक् कुत्र अर्थवती भवति ?

(१५) पातालानि कति सन्ति ?

--००--